(घ) वास्तविकं भारतं नाम ग्राम एव ।

(ङ) तैः सह मिलित्वा वार्तालापं कृतवन्तः।

## 4. पाठाधारेण क्त्वान्तपदानि लिखत–

| | पदानि | धातुः | | प्रत्ययः | | क्त्वान्तरूपम् |
|---|---|---|---|---|---|---|
| **यथा-** | भवति | (भू) | + | क्त्वा | = | भूत्वा |
| (क) | मिलति | (मिल्) | + | क्त्वा | = | ............... |
| (ख) | पश्यति | (दृश्) | + | क्त्वा | = | ............... |
| (ग) | करोति | (कृ) | + | क्त्वा | = | ............... |
| (घ) | सहति | (सह्) | + | क्त्वा | = | ............... |
| (ङ) | स्मरति | (स्मृ) | + | क्त्वा | = | ............... |
| (च) | शृणोति | (श्रु) | + | क्त्वा | = | ............... |
| (छ) | गच्छति | (गम्) | + | क्त्वा | = | ............... |
| (ज) | पठति | (पठ्) | + | क्त्वा | = | ............... |

## 5. उदाहरणानुगुणं ल्यबन्तरूपाणि लिखत–

| | उपसर्गः | | धातुः | | प्रत्ययः | | ल्यबन्तरूपम् |
|---|---|---|---|---|---|---|---|
| **यथा-** | आ | + | नी | + | ल्यप् | = | आनीय |
| (क) | उत् | + | स्था | + | ल्यप् | = | ............. |
| (ख) | वि | + | क्री | + | ल्यप् | = | ............. |
| (ग) | स्वी | + | कृ | + | ल्यप् | = | ............... |
| (घ) | प्र | + | क्षाल् | + | ल्यप् | = | ............... |
| (ङ) | वि | + | चिन्त् | + | ल्यप् | = | ............... |
| (च) | वि | + | ज्ञा | + | ल्यप् | = | ............... |
| (छ) | वि | + | लिख् | + | ल्यप् | = | ............... |
| (ज) | उप | + | कृ | + | ल्यप् | = | ............... |
| (झ) | आ | + | गम् | + | ल्यप् | = | ............... |

6. **क्त्वा/ल्यप् योगेन वाक्यानि योजयन्तु–**

**यथा–** बालिका प्रश्नान् पठति। उत्तराणि लिखति।
बालिका प्रश्नान् पठित्वा उत्तराणि लिखति।

(क) बालकः फलं खादति। दुग्धं पिबति।

(ख) कविः संस्कृतं जानाति। काव्यं लिखति।

(ग) ऋचा गृहम् आगच्छति। गृहकार्यं करोति।

(घ) अर्चकः देवालयं गच्छति। पूजां करोति।

(ङ) माता शाकानि आनयति। पाकं करोति।

(च) जनकः प्रभाते उत्तिष्ठति। योगाभ्यासं करोति।

(छ) दीपेशः हस्तं प्रक्षालयति। भोजनं करोति।

(ज) समिधा मनसि विचिन्तयति। लेखं लिखति।

(झ) आराधना स्नानं करोति। पूजां करोति।

(ञ) विक्रेता वस्तूनि विक्रीणाति। धनम् अर्जयति।

7. **भिन्नप्रकृतिकं पदं चिनुत–**

(क) गत्वा, पठित्वा, भूत्वा, हसित्वा, पठितुम्।

(ख) दुग्धम्, दधि, नवनीतम्, तक्रम्, रोटिका।

(ग) भ्राता, भगिनी, माता, पिता, शिक्षकः।

(घ) काकः, कोकिलः, कपोतः, शुकः, मत्स्यः।

**योग्यताविस्तारः –**

- ग्रामीणजनानां दिनचर्यां ज्ञात्वा पञ्चवाक्यानि लिखत।

*ग्रामे भारतदर्शनम्।*